तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति" "अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तमिति" च। ननु नास्ति तत्र ज्ञानप्रतिबन्धकारणवानीश्वरादन्यः संसारी। "नान्योऽतोऽस्ति द्रष्टेति विज्ञातेति" श्रुतेः तत्र किमिदमुच्यते संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिर्नेश्वरस्येति। अत्रोच्यते सत्यं नेश्वरादन्यः संसारी तथापि देहादिसंघातोपाधिसंबन्ध इष्यत एव घटकरकगिरिगुहाद्युपाधिसंबन्ध इव व्योम्नः, तत्कृतशब्दप्रत्ययव्यवहारा लोकस्य दृष्टाश्च, घटच्छिद्रं करकच्छिद्रमित्यादिराकाशाव्यतिरेकेऽपि तत्कृता चाकाशे घटाकाशादिभेदमिथ्याबुद्धिर्दृष्टा तथेहापि देहादिसंघातोपाधिसंबन्धाविवेककृतेश्वरसंसारिभेदमिथ्याबुद्धिः। दृश्यते चात्मन एव सतो देहादिसंघातेऽनात्मन्यात्माभिनिवेशो मिथ्याबुद्धिमात्रेण सति चैवं संसारित्वे देहाद्यपेक्षमीक्षितृत्वमुपपन्नं संसारिणः" भा०। जीवस्यापि अवास्तविकं सशरीरत्वं तदपि तत्रैव व्यवस्थापितं यथा "शरीरे पतितेऽशरीरत्वं स्यान्न जीवत इति चेत् न सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्। नह्यात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा अन्यतः सशरीरत्वं शक्यं कल्पयितुम् नित्यमशरीरत्वम् अकर्मनिमित्तत्वादिति चावोचामः। तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेत् शरीरसम्बन्धस्यासिद्धत्वात् धर्माधर्मयोरात्मकृतत्वासिद्धेः। शरीरसम्बन्धस्य धर्माधर्मयोस्तत्कृतत्वस्य चेतरेतराश्रयत्वप्रसङ्गात्। अन्धपरम्परैषाऽनादित्वकल्पना क्रियासमवायाभावाच्चात्मनः कर्त्तृत्वानुपपत्तेः। सन्निधिमात्रेण राजप्रभृतीनां दृष्टं कर्त्तृत्वमिति चेन्न धनदानाद्युपार्जितभृत्यसम्बन्धत्वात् तेषां कर्त्तृत्वोपपत्तेः। नह्यात्मनो धनदानादिवच्छरीरादिभिः स्वस्वामिसम्बन्धनिमित्तं किञ्चिच्छक्यं कल्पयितुम् मिथ्याभिमानस्तु प्रत्यक्षः सम्बन्धहेतुः" शा०भा०।

**अशरीरत्व** न० अशरीरस्य भावः त्व। १शरीरसम्बन्धराहित्ये २मोक्षे च। यथा मोक्षस्याशरीरत्वं तथोक्तं शा० भा०। "अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः" इति प्रियाप्रियस्पर्शनप्रतिषेधाच्चोदनालक्षणधर्मकार्य्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते। धर्मकार्य्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधो नोपपद्यते। अशरीरत्वमेव धर्मकार्य्यमिति चेत् तस्य स्वाभाविकत्वात्। "अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति" "अप्राणो ह्यमनाः शुभ्रः असङ्गो ह्ययं पुरुष" इत्यादि श्रुतिभ्यः। अतएवानुष्ठेयफलविलक्षणं मोक्षाख्यमशरीरत्वं नित्यमिति सिद्धम्"। अयं भावः अभावस्याधिकरणानतिरेकेण शरीरसम्बन्धाभावस्य ब्रह्मरूपतया मोक्षस्य तदभिन्नतया च तथात्वम् इति।

**अशरीरिन्** त्रि० न शरीरी। १देहशून्ये ब्रह्मणि २मीमांसकोक्ते देवमात्रे च। शरीरमुच्चारयितृत्वेनास्त्यस्य इनि न०त०। ३शरीरेणानुचार्य्ये आकाशशब्दे। उभयत्र स्त्रियां ङीप्। "वागुवाचाशरीरिणी" भा०आ०प०। [शून्ये त्रि०।

**अशर्म्मन्** न० विरोधे न०त०। १शर्म्मभिन्ने दुःखे न०ब०। २सुख

**अशाखा** स्त्री नास्ति शाखा यस्याः। शूलीतृणे राजनि०। २शाखाशून्ये वृक्षमात्रे त्रि०।

**अशान्त** त्रि० विरोधे न०त०। शान्तभिन्ने शमहीने "नास्ति बुद्धिरयुक्तस्य—अशान्तस्य कुतः सुखम्" गीता। [त्रि०।

**अशान्ति** स्त्री अभावे न०त०। १शमाभावे न०ब०। २शमशून्ये

**अशाश्वत** त्रि० न शाश्वतः। अनित्ये अस्थिरे।

**अशासन** त्रि० अभावे न०त०। १शासनाभावे न०त०। २शासनशून्ये। [वेदादिविरुद्धे नास्तिकागमादौ।

**अशास्त्र** न० शास-करणे ष्ट्रन् शास्त्रं वेदादि विरोधे न०त०।

**अशास्त्रीय** त्रि० शास्त्रे विहितः छ न०त०। शास्त्राविहिते निषिद्धे।

**अशास्य** त्रि० शास—बा० ण्यत्। शासितुमशक्ये दुर्दान्ते।

**अशिक्षित** त्रि० विरोधे न०त०। शिक्षाशून्ये गतिनैपुण्यशून्ये हयादौ।

**अशित** त्रि० अश—कर्म्मणि क्त। १भक्षिते "आपएव तदशितं नयन्ते" "अन्नमशितं त्रेधा विधीयते" "तेजोऽशितं त्रेधा विधीयते" इति च छा०उ०। कर्त्तरि क्त। २अशनेन तृप्ते आशितङ्गवीनः भावे "क्त" ३अशने न०।

**अशित्र** पु० अश—संहतौ इत्र। १चौरे। भोजनार्थात् कर्म्मणि इत्र। देवभक्ष्ये २चरौ।

**अशिथिल** त्रि० विरोधे न०त०। शिथिलभिन्ने दृढे।

**अशिपद** त्रि० न स्निपदः पदरोगभेदः वेदे पृ० सलोपः न०ब०। स्निपदरोगशून्ये। "शिवा देवीरशिपदा भवन्तु सर्वाः" ऋ० ७,५०,४।

**अशिमिद** त्रि० "शिमिर्वधकर्म्मा" निरु० शिमिं हिंसां ददाति दा—क उप०स०। अहिंसके "सर्वा नद्यो अशिमिदा भवन्तु" ऋ० ७,५०,४।